© 2018 IJSRST | Volume 4 | Issue 7 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# रसनिष्पत्तिपर्यालोचनम्



डॉ. कुन्दनकुमारः
टी. जी. टी. (संस्कृत)
कोर एकेडमिक यूनिट
शिक्षा निदेशालय

भारतीयकाव्यशास्त्रे रसास्वादस्य प्रश्ने विवादास्पदे सत्यपि रसनिष्पत्तिविषयकं भरतकृतरससूत्रमत्यधिकं महत्त्वपूर्णमस्ति । रसस्य सम्पूर्णविवेचने रसनिष्पत्ते: महत्त्वपूर्ण स्थानमस्ति। तच्च भरतकृतं रसनिष्पत्तिसूत्रमस्ति -

"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः।"

रसस्वररूपमुपस्थाप्यपि भरतमुनिः रसास्वादनविषये मौनतामुपगतः, परञ्चाग्रे विषयोऽयमत्यन्तं महत्त्वपूर्णः सञ्जातः। अनेके चाचार्या: अस्मिन् विषये विचारमकुर्वन्। तन्मतानुसारं नाटकेन काव्येन च सम्बद्धः चत्वारः जनाः सन्ति ये रसास्वादं कुर्वन्ति । तेषां विवरणमधः कृतो वर्तते -

(1) प्रथमः ऐतिहासिक: पौराणिको वा सः पात्रः भवति यस्य कवि: स्वरचनायां वर्णयति । सः पात्रः अनुकार्य: अपि कथ्यते।

(2) द्वितीय: तु मूलपात्रस्य ऐतिहासिकपात्रस्य वा सः रूपः भवति यः कवेः मनसि प्रतिबिम्बितो भूत्वा प्रस्तुत: भवति ।

(3) तृतीयः कविः नाटककारो वा भवति ।

(4) चतुर्थ: पाठकाः, सहृदयाः, सामाजिका: दर्शका: वा भवन्ति ।

IJSRST1824409 | Received : 01 April 2018| Accepted : 25 April 2018| March-April-2018 [(4)7 491-507 ]

नाटकेन सम्बद्धः नट: नटी च भवतः। अनेन प्रकारेण मुख्यतः रसास्वादनस्य त्रयोऽधिकारिणः दृश्यन्ते - अनुकार्यः (ऐतिहासिकः काल्पनिको वा पात्रः), अनुकर्ता (नट: नटी वा) तथा सामाजिकः। उपर्युक्तानां त्रयाणामाधृत्येव रसास्वादनस्य समस्यायाः समाधानं कर्तुं शक्यते।

## (क) रससूत्रस्य भरतकृतव्याख्या

भरतकृतरससूत्रे संयोगनिष्पत्तिशब्दयोरर्थो न स्पष्टः, एतावेव चाधिकृत्य परवर्तिष्वाचार्येषु गहन: शास्त्रार्थ: प्रवृत्तः। भरतेन स्वयं निष्पत्तिपदार्थस्तावदित्थं निगदित:- "यथा हि नानाव्यञ्जनौषधिद्रव्यसंयोगाद्रसनिष्पत्तिः तथा नानाभावोपगमाद् रसनिष्पत्तिः। यथा गुडादिभिर्द्रव्यैर्व्यञ्जनैरौषधिभिश्च षड्रसा निर्वर्त्यन्ते, एवं नानाभावोपहिता अपि स्थायिनो भावा रसत्वामाप्नुवन्ति।[1]

अत्र प्रथमोपवाक्ये रसनिष्पत्तिरिति, द्वितीये रसा निर्वर्त्यन्त इति, तृतीये च रसत्वमाप्नुवन्तीति तिस्रः परस्परसम्बद्धा: क्रिया: प्रयुक्ताः। एतासामाधारेण - "निर्मितिभवनस्वरूपप्राप्तयो निष्पत्तिपदार्था भवन्ति । इमे सामान्या अपारिभाषिका: कोशार्थाः - निस् + पद् (गतौ) क्तिन् नि:शेषरूपेण स्थितिप्राप्तिकरणम्, स्थितिप्राप्तिभावः अस्तित्वप्राप्तिः सिद्धिः।"

संयोगशब्दार्थमपि विशदतया भरतेनोल्लिखितम् - यथा हि नानाव्यंजनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति हर्षादींश्चाधिगच्छन्तीति 'सुमनसः' पुरुषा इत्यभिव्याख्याता:। तथा नानाभावाभिनयव्यञ्जितान् वागंगसत्वोपेतान् स्थायिभावानास्वादयन्ति हर्षादींश्चाधिगच्छन्तीति प्रेक्षकाः 'सुमनस' इत्यभिव्याख्याताः।[2]

एतदुद्धरणाधारेण स्थायिभावैः सह सम्यग्योग: सङ्गम इति संयोगपदार्थः। दृष्टान्तगताभ्याम् उपगतोपेतशब्दाभ्यामप्यस्यैवार्थस्य पुष्टिर्भवति । अनेन दृष्टान्तानुसारेण -

नाट्यरसः - भोज्यरस:

स्थायिभावः - अन्नम्

विभावानुभावव्यभिचारिण: - द्रव्यव्यञ्जनौषधयः।

यथा द्रव्यव्यञ्जनौषधीनामन्नेन संयोगात् षाडवादयो भोज्यरसा निर्वर्त्यन्ते सिद्धयन्ति वा। अतो रससूत्रस्य स्वयं भरताभिमतोऽर्थः- विभावानुभावव्यभिचारिभावानां स्थायिभावेन सह संयोगात्संसर्गाद् वा रससिद्धिर्भवतीति। आधारभूतं तु तत्त्वं स्थायिभावः, यदा स विभावादिभि: संयुज्यते तदा रस: सिद्धयति। संयोगार्थोऽत्र संसर्गः। निष्पत्तिपदार्थो द्विविध: - उत्पत्ति: (अभावे भावकल्पना) निर्मितिश्च । भरतेन यद्यपि रसप्रसंगेऽस्मिन् उत्पत्तिशब्द: पौन:पुन्येन प्रयुक्त: किन्तु दृष्टान्तेन स्पष्टमिदं यदयमुत्पत्तिशब्द: औपचारिक: एवास्ति, न त्वभावे भावसर्जनार्थकः। विद्यमानोपकरणसंयोगेन नवरूपरचना निर्मितिपदार्थः। आधारभूतानामुपकरणानां परिणतित्वेऽपि तद्भिन्नेयं भवति। रसनिष्पत्तिपदस्यायमेवार्थो भरतस्याभिमतः। न खलु रस: कश्चिदीदृशो नूतनः पदार्थः, यस्य सर्वथा प्रागभाव: स्यात्। तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति वचनस्यायमर्थो यद् विभावाद्युपगतः स्थायिभाव एव रसो भवतीति। रस: स्थायिभावाभिन्नोऽन्नात्याडवादिरसवत्। तदाधारस्तु स्थाय्येव यो रसत्वे परिणमति। अतो रसरूपेण कस्यचिन्नूतनपदार्थस्य सृष्टिर्न भवति । विद्यमान: स्थायिभावरूपः पदार्थ एवोपकरणान्तरसहयोगेन नवीनं रूपं धत्ते । नूतनसृष्टिरिति न नूतनपदार्थः। अपि तु संस्कारादिक्रियाणां व्यञ्जनादिपदार्थानाञ्च संयोगेन नवरूपप्राप्तिरेव सा। दृष्टान्ताधारेण भरतसम्मतोऽयमेव निष्पत्तिपदार्थ: सिद्धयति । षाडवादयो रसा निर्वर्त्यन्ते इत्यत्र निर्मिता भवन्तीति।[3]

परवर्तिनि काव्यशास्त्रेऽस्य मौलिकस्य भरतसूत्रस्य नानाव्याख्यानविवेचनान्यारभ्यन्त, रससिद्धान्तश्च क्रमशो व्यकसत्। आचार्याभिनवगुप्त: अतिविस्तरेण तेषां व्याख्यानमकरोत्। रसमीमांसायाम् पुर्ववर्तीनामेतेषामाचार्याणां ग्रन्थाः नोपलभ्यन्ते परञ्च अभिनवगुप्ताचार्यस्य अभिनवभारत्याम् ध्वन्यालोकलोचने काव्यप्रकाशे च तेषां मतान्युपलभ्यन्ते।

रससूत्रव्याख्याकारा: प्रमुखतया चत्वारः सन्ति। ते च सन्ति - भट्टलोल्लटः, श्रीशंकुकः, भट्टनायक:, अभिनवगुप्ताचार्यश्च ।

## (ख) भट्टलोल्लटस्योत्पत्तिवादः

भरतसूत्रव्याख्यातृषु प्रथमं नाम भट्टलोल्लटस्य स्मर्यते । मीमांसकस्य भट्टलोल्लटस्य मतमुत्पत्तिवाद: आरोपवाद: वा कथ्यते। अस्य मतस्योल्लेख: अभिनवगुप्तेन अभिनवभारत्यां ध्वन्यालोकलोचने च पुन: मम्मटेन काव्यप्रकाशेऽपि कृत:। तन्मतानुसार रससूत्रस्यार्थ:- “विभावानुभावव्यभिचारिभिः संयोगाद् उत्पाद्योत्पादकभावादिरूपसम्बन्धात् रसस्य रत्यादेः, निष्पत्तिः = उत्पत्ति: प्रतीति: पुष्टिश्च।’’

अत्र विभावादिभि: सह संयोगः कस्य भवति इति समादधता भट्टलोल्लटाचार्य: स्वयमाचक्षते - स्थायिनः (स्थायिभावस्य)। अत्र विभाव: स्थायिभावस्योत्पत्तौ कारणं मन्यते - "तत्र विभावश्चित्तवृत्ते: स्थाय्यात्मिकाया उत्पत्तौ कारणम्।”

मुख्यत: अयम् संयोगादित्यस्य जन्यजनकभावरूपात्सम्बन्धात् (कार्य-कारणभावरूपसम्बन्धात्) इत्यर्थं कृत्वा रसं विभावादीनां कार्यमाहुः। अयमासीन्मीमांसकोऽभिधावादी च, समस्तकाव्यार्थस्य साधनमभिधाशक्तिरेवेति स्वीकृतवान्। एतस्य मतमासीत् यच्छब्दस्य प्रत्येकार्थप्रतिपत्तिरभिधयैव तथा भवति यथा एक एव बाणः कवचं निर्भिद्य शरीरे प्रविश्य च प्राणानापहरतीति। एतन्मते अभिधाव्यापारः दीर्घदीर्घतरः अस्ति, तथा यस्यार्थस्य प्रतिपादनार्थं प्रयुज्यते सैव शब्दस्य मुख्यार्थो भवति - "सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः, यत्परः शब्दः स शब्दार्थः।"

अभिनवभारत्यां भट्टलोल्लटमतमेवमुद्धृतमस्ति - “अत्र भट्टलोल्लटप्रभृतयस्तावदेवं व्याचख्युः - विभावादिभिः संयोगोऽर्थात् स्थायिनस्ततो रसनिष्पत्तिः। तत्र विभावश्चित्तवृत्ते:

स्थाय्यात्मिकाया: कारणम्। अनुभावाश्च न रसजन्या अत्र विवक्षिताः, तेषां रसकारणत्वेन गणनानर्हत्वात्। अपितु भावानामेतेऽनुभावाः। व्यभिचारिणश्च चित्तवृत्यात्मकत्वाद्यद्यपि न सहभाविनः स्थायिना, तथापि वासनात्मनेह तस्य विवक्षिताः। दृष्टान्तेऽपि व्यञ्जनादिमध्ये कस्यचिद् वासनात्मकता स्थायिवत्, अन्यस्योद्भूतता व्यभिचारिवत्। तेन स्थाय्येव विभावानुभावादिभिरुचितो रसः। स्थायी त्वनुपचितः। स चोभयोरपि, मुख्यया वृत्या रामादावनुकार्ये, अनुकर्तरि च नरे रामादिरूपतानुसंधानवलादिति।"[4]

ध्वन्यालोकलोचने इत्थमुद्धृतम्- 'तथाहि पूर्वावस्थायां यः स्थायी स एव व्यभिचारिसम्पातादिना प्राप्तपरिपोषोऽनुकार्यगत एव रसः। नाट्ये तु 'प्रयुज्यमानत्वान्नाट्यरस' इति केचित्।

मम्मटोद्धृतं लोल्लटमतम् -"विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणै: रत्यादिको भावो जनित:, अनुभावै: कटाक्षभुजाक्षेपप्रभृतिभि: कार्यै: प्रतीतियोग्यः कृतः, व्यभिचारिभिर्निर्वेदादिभि: सहकारिभिरूपचितो मुख्यया वृत्या रामादावनुकार्ये तद्रूपतानुसन्धानान्नर्तकेऽपि प्रतीयमानो रस इति भट्टलोल्लटप्रभृतयः।"

एषामुद्धारणानामाधारेण भट्टलोल्लटमन्तव्यविषये तथ्यानीमानि लभ्यन्ते -

(i) अपरिपक्वः स्थायिभावः विभावानुभावव्यभिचारिभावानां संयोगेन परिपक्वो भूत्वा रसेति नाम्ना अभिहितो भवति । यथाहि भट्टलोल्लटस्तावदेवं व्याचचक्षे - "विभावादिभिः संयोगोऽर्थात् स्थायिनः ततो रसनिष्पत्ति:। ....... स्थाय्येव विभावानुभावादिभिरूपचितो रस:। स्थायी त्वनुपचितः । स चोभयोरपि अनुकार्ये अनुकर्तयपि चानुसन्धानबलात्।[5]

(ii) अयं रस: अनुकार्ये वास्तविकरामादौ अपि भवति तथा अभिनयकौशलबलेन रामादे: अनुकर्तरि नटेष्वपि । यथाहि - "विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणै: रत्यादिको भाव: जनितः, अनुभावै: कटाक्षभुजाक्षेपप्रभृतिभि: कार्यैः प्रतीतियोग्यः कृतः व्यभिचारिभिर्निवेदादिभिः सहकारिभिरूपचितो, मुख्यया वृत्या रामादावनुकार्ये, तद्रूपताऽनुसन्धानान्नर्तके प्रतीयमानो रस इति भट्टलोल्लटप्रभृतयः"।[6]

एवं मम्मटाचार्यः स्पष्टं करोति यत्-

(क) स्थायिभावस्य आलम्बनोद्दीपनविभावैः जनक-जन्यसम्बन्धः

(ख) स्थायिभावस्य अनुभावैः गम्य-गमकसम्बन्धः

(ग) स्थायिभावस्य व्यभिचारभावैः पोषक-पोष्यसम्बन्धः अस्ति।

एतेन स्पष्ट भवति यत् स्थायिनां विभावेन उत्पाद्योत्पादकभावरूपात् अनुभावेन गम्यगमकभावरूपात्, व्यभिचारिणा पोष्यपोषकभावरूपात् संयोगात् त्रिसम्बन्धात् क्रमेण रसस्य उत्पत्तिः, प्रतीतिः पुष्टिश्च भवति इत्यर्थं स्वीकुर्वन्ति। तदयं निर्गलितोऽर्थः - ललनादिभिरालम्बनविभावैः स्थायी रत्यादिको भावः जनितः उद्यानादिभिः उद्दीपनविभावैः उद्दीपितः अनुभावैः कटाक्षभुजक्षेपप्रभृतिभिः प्रतीतियोग्यतां प्राप्तः व्यभिचारिभिः उत्कण्ठादिभिः सहकारिभिः परिपोषितः मुख्यया वृत्या अभिधया रामादानुकार्ये सीताविषयकरत्यादिः स्थायिभावः एव रसः।

समीक्षा - भरतसूत्रे स्थायिभावस्य पृथगुल्लेखो न वर्तते। इदं च तादृशं वस्तु नास्ति यत्पूर्वमपुष्टरूपेण विद्यमानं सत् पश्चात् पुष्टीभूय रसरूपं धत्ते । विभावादिकं विना मूलाश्रये स्थायिभावो भवितुमेव नार्हति, कुतः पुनस्ते पुष्टिरिति?

मतेऽस्मिन् द्वितीयो दोष एवमापतति यत्स्थायिभावोऽयं न कार्यरूपः। कार्यरूपः स्यात्तदा निमित्तकारणक एव स्यात् । तथा च सति निमित्तकारणव्यपगमे नटादिकं कार्यं स्वात्मना तिष्ठति किन्तु न ह्येवं तथा, विभावादिनष्टे सति रसोऽपि न तिष्ठति। अतएव विभावादिः कारकहेतुर्न वा जनकहेतुः। पूर्वमविद्यमानत्वान्न ज्ञापकहेतुरपि । रस उत्पद्यते इति यद्येतन्मतं तर्हि दर्शके केन प्रकारेण संक्रमितो भवति? रतिर्यत्र तिष्ठेत्तत्रैव रसोऽपि भवितुर्युक्तः, कार्यकारणयोरेकाधिकरणवृत्तित्वनियमात्। अनुकार्योऽस्मद्-दृष्टिगोचरात्परः। अनुकर्तरि तस्यारोपो भवति। आरोपितो रसो दर्शकेषु कथं चमत्कारमुत्पादयेत्, तत्राधारत्वस्य मिथ्यात्वं स्पष्टमेव भवेदिति।

ऐतिहासिकपात्रेषु रसोत्पत्ति: मन्यते चेत् पुनरेका शंकोत्पद्यते यत् संसारे मूलपात्रेषु अविद्यमानेषु सति नट: तस्य अभिनयं कर्तुं नार्हति, अत: तेनाभिनयेन रसनिष्पत्तिर्न जायते । एवं प्रकारेण अनुकर्तरि नटे रसोत्पत्ति: असंभवः।

पुनश्चायं मत: भरतमतविरुद्धः अप्यस्ति । भरत: सामाजिकगतरसमंगीकरोति - “आस्वादयन्ति सुमनसः प्रेक्षका:’’ इति। परञ्च लोल्लट: रसं नायकगतं मन्यते, नटेऽपि आरोपितं करोति च। एष: आरोप: सामाजिके भवति यतोहि लोल्लटानुसार तद्रूपतानुसन्धानबलात्" इति। एष अनुसन्धान: यदि नटेन क्रियते तर्हि सामाजिकै: सम्बन्धः न सिद्धयति, यदि सामाजिक: करोति चेत् तस्य आनन्दानुभूतिर्न जायते, प्रत्युत करुणादौ दु:खप्राप्तिः एव भवति। नाटके काव्ये वा रसस्य सार्थकता सामाजिकानां कृते भवति परन्तु लोल्लट: सामाजिकानां रसास्वादनविषये मौनतामुपगतः। अत: मतोऽयं प्रतिष्ठां न लेभे।

## (ग) श्रीशंकुकस्यानुमितिवादः

भट्टलोल्लटस्य मतेनासंतुष्टः श्रीशंकुक: न्यायदर्शनस्य अनुमानप्रमाणवादस्य सिद्धान्तानुसारमनुमितिवादनाम-कमपरसिद्धान्तमस्थापयत्। भट्टलोल्लटस्य विरोधं कुर्वता तेन निष्पत्तेरर्थमनुमितीत्यप्रत्यपादयत्। अर्थात् रस: नोत्पद्यते अपितु अनुमितो भवति। श्रीशंकुकानुसारं रंगमञ्चस्थे रामस्याभिनयं कुर्वति अनुकर्तरि नटे रामस्य या प्रतीतिर्भवति सा सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिभ्यो भिन्ना, चित्रतुरगन्यायेन विलक्षणा प्रतीतिर्भवति। यथा हि चित्रे तुरगस्य ज्ञानं न यथार्थज्ञानम्, उत्तरकाले बाधाभावात् नैव मिथ्याज्ञानं, नैव तत्र संशयः नापि सादृश्यात्मकं ज्ञानं तथैव नटे रामस्य यथार्थं ज्ञानं नास्ति, यतो हि तद्वति तत्प्रकारकं ज्ञानमेव यथार्थज्ञानं भवति। एवं सत्यपि इदं मिथ्याज्ञानमपि नास्ति, यतस्तज्ज्ञानस्य उत्तरकाले बाधो न भवति। अर्थात् यावत् कालपर्यन्त प्रेक्षक: रामाभिनयं प्रेक्षते तावत्कालपर्यन्तं न रामोऽयमितयाकारक मिथ्यज्ञानं न जायते। तत्र अयं रामो न वेति संशयोऽपि न भवति। नैव रामसदृशोऽयम् इति सादृश्यज्ञानं वर्तते। एवञ्च

सम्यमिथ्यासंशयसादृश्यप्रीतिभ्यो विलक्षणया प्रतीत्या ज्ञाते कृत्रिमे नटे अनुभावव्यभिचारिभावा अपि कृत्रिमा विलक्षणा एव भवन्ति। किन्तु शिक्षाभ्यासवशात् अनुकर्ता नटः तथाभिनयं करोति येन कृत्रिमकारणकार्यसहकारीणि स्वाभाविकानि सन्ति तान्येव विभावानुभावव्यभिचारिभावव्यपदेश्यानि भवन्ति। एतेषामेव विभावादीनां संयोगात् साध्यसाधकभावरूपात् अनुमाप्यानुमापकभावसम्बन्धात् नटे रत्यादीनां निष्पत्तिरर्थादनुमितिर्भवति। प्रेक्षकस्तस्मिन्नटे रामोऽयं सीताविषयकरतिमान् सीताद्यात्मकविभावादिसम्बन्धित्वात् सीताविषयककटाक्षादिमत्त्वाद्वा। यो नैव स नैव यथाऽहम् इत्यादिरूपमनुमानं करोति। एवं हि अनुमीयमानोऽपि रत्यादिभाव: रतिरूपवस्तुसौन्दर्यात् अन्यानुमीयमानपदार्थात् विलक्षणो भवति, येन परोक्षात्मिकापि अनुमितिः प्रकृते प्रत्यक्षात्मिका रसानुमितिर्भवति। एतेनैव वैलक्षण्येन सामाजिक: नटे वस्तुतोऽविद्यमानाया अपि रते: रसरूपेण अनुमित्यात्मकमास्वादं करोति। यथाहि मम्मट: काव्यप्रकाशे श्रीशंकुकस्य मतं वर्णयति - "राम एवायम् अयमेव राम इति, न रामोऽयमित्यौत्तरकालिके बाधे रामोऽयमिति रामः स्याद्वा न वाऽयमिति, रामसदृशोऽयमिति च सम्यक्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणया चित्रतुरगादिन्यायेन रामोऽयमिति प्रतिपत्त्या ग्राह्ये नटे -

सेयं ममांगेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः।
मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गता।
दैवादमहद्य तया चपलायतनेत्रया वियुक्तश्च।
अविरलविलोलजलद: काल: समुपागतश्चायम्॥

इत्यादिकाव्यानुसन्धानबलाच्छिक्षाभ्यासनिर्वर्तितस्वकार्यप्रकटनेन च नटेनैव प्रकाशितैः कारणकार्यसहकारिभि: कृत्रिमैरपि तथाऽनमिमन्यमानैर्विभावादिशब्दव्यपदेश्यैः संयोगात् गम्यगमकभावरूपात् अनुमीयमनोऽपि वस्तुसौन्दर्यबलाद्रसनीयत्वेनान्यानुमीयमानविलक्षण: स्थायित्वेन सम्भाव्यमानो रत्यादिर्भावस्तत्रासन्नपि सामाजिकानां वासनया चर्व्यमाणो रस इति श्रीशंकुकः।[7]

यथा कुत्रापि वास्तविकधूमस्य असत्त्वेऽपि ज्ञाततया तत्र धूमनियतवह्नेरनुमानं भवति, तथैव नटे वास्तविकविभावादीनां सत्त्वेऽपि नटाभिनयेन प्रतीतैः विभावादिभि: रतेरनुमानं भवति। अनुमिता चासौ रतिः स्वसौन्दर्यबलात् सामाजिके आस्वाद्यमाना रसत्वं प्राप्नोति। सैवेयं रसानुमिति: रसनिष्पत्तिरिति सारांश:। एवं प्रकारेण रससूत्रस्य अर्थो भविष्यति -
"विभावानुभावव्यभिचारिसंयोगात् = गम्य-गमक-भावरूपसम्बन्धात्, रसस्य = रत्यादेः, निष्पत्तिः = अनुमितिः।

पण्डितराज: रसगंगाधरे शंकुकस्य मतमुल्लिखति - "विभावादिभि: कृत्रिमैरपि अकृत्रिमतया गृहीतैः संयोगादनुमानाद्रसस्य रत्यादेर्निष्पत्तिरनुमिति नटादौ पक्ष इति शेष:।[8]
अर्थात् कृत्रिमे सति अकृत्रिमरूपेण गृहीतै: विभावादिभि: संयोगे सति अनुमानेन नटपक्षे रते: निष्पतिरनुमितिर्वा रस इत्युच्यते।

एवं प्रकारेण स्पष्टं भवति यत् शंकुकस्य सिद्धान्तस्य भागद्वयं वर्तते -
(क) सामाजिकै: नटे (तस्मिन् नटे य: कुशलाभिनयतल्लीनतायां स्वयमात्मानं रामादिनायकोऽस्मीत्यवगच्छति) रामादे: रत्यादिभावानामनुमति।
(ख) तदा सामाजिकेभ्यः स्ववासनया तासां भावानां रंगमंचीयसौन्दर्यप्रभावबलेन रसानुभूते: प्राप्तिः।

समीक्षा - शंकुकरस्य परवर्तिन: आचार्या: अनुमानवादस्योपर्यनेकविधमाक्षेपं कृतवन्तः। तथा हि नटरूपे रामपक्षे रामत्वं सिद्ध: नास्ति। यानि अनुभावव्यभिचारिभावादीनि साधनानि सन्ति तान्यपि कल्पितान्येव सन्ति । अत: कल्पितपक्षे कल्पितसाधनैर्या रति: साध्यते सापि संभावितैव स्यात् । परोक्षात्मिकाया अनुमितेः साक्षात्कारात्मकानुभूतिरूपत्वमपि न्यायसंगतं नास्ति यतोहि प्रत्यक्षमेव ज्ञानं चमत्कारजनके नानुमित्यादि इत्येव नियमः। अपरञ्च पूर्वोक्तानुमाने यथाऽहमिति व्यतिरेकिदृष्टान्तेन सामाजिक: एव व्यतिरेकिकोटौ समापतति।

श्रीशंकुकेन हि अनुकरणानुमानयोरूपर्येवाग्रहः कृतः। तत्र न स्थायिभावस्य न वा सहचारिणः अनुकरणं भवितुमर्हति वेशभूषानुभावानामेवानुकरणसम्भावात्। समुद्रलंघनाद्युत्साहस्य मानसिकप्रत्यक्षं तु साधारणमनुष्यस्य कथं कथमपि न भवितुमर्हति। वास्तविकं तु नट: स्ववेशभूषायां तन्नायकस्थिते: साधारणरूपेण धारणं करोति। अनुमाने चित्रतुरगादिन्यायानुसारेणासत्याधारात्सत्यं प्रतिष्ठापयितुकामोऽयं बालकानां यथाकथञ्चित् प्रतीयते भवेन्नान्येषाम् मृगतृष्णाजलेन न कस्यापि पिपासाशान्ति: स्नानं वा सम्भवितुमर्हति। अथ चानुमानं बुद्धेर्विषयो व्यवहितञ्च। अन्यस्य रतिरन्यं कथं संगच्छेत् तथाभावे रसानुमिति: कथम्? सामाजिकातिरिक्तः को हि तदरसानुभूतिं कुर्यात्? अनुमितिं विनापि रसमहं साक्षात्करोमि इत्यनुव्यवसाय: रसस्यानुमेयत्वं निराकरोति। एवञ्च विविधाभिरापत्तिभिः न शक्यसम्भवम् ।

## (घ) भट्टनायकस्य भुक्तिवादः

रससूत्रस्य तृतीयव्याख्याता भट्टनायक: सांख्यदर्शनानुसारं भुक्तिवादस्य परिपोषक: आसीत्। यथा सांख्ये सुखदु:खादयः अन्त: करणस्य धर्मा: सन्ति नह्यात्मनः धर्माः। परन्तु पुरुषाणामन्त: करणेन सम्बद्धतया तेषामौपाधिको प्रतीति: यथा तथैव सामाजिकेषु अनवस्थितस्य रसस्य भोगः तेषां सहृदयानां भवति ।

भट्टनायकानुसारेण रसो नोत्पद्यते, नाभिव्यज्यते, अपितु भोजकत्वव्यापारविशेषेण भुज्यते । अनुकार्यानुकारकसामाजिकेषु त्रिषु अनुकार्यरामादिगतत्वेन तदानीं रसस्य उत्पत्तिः प्रतीतिर्वा न सम्भाव्यते अनुकार्यरामादेर्भूतकालिकत्वात्। अनुकारकनटादिगतत्वेनापि रसोत्पत्तिं तत् प्रतीतिं वा स्वीकर्तुं न शक्यते, तथात्वे सामाजिकस्य कृते रसोत्पत्ते: प्रतीतेर्वा निष्प्रयोजनत्वात्। सामाजिकगतत्वेनापि रसोत्पत्तिमंगीकर्तुं न शक्यते, यत: सीतादिविभावः रामं प्रति विद्यते न तु सामाजिकं प्रति। साधारणीकरणेन सीतादिविभावः स्वं विशिष्टं रूपं परिहाय सामान्यनायिकारूपेण हृदिस्थो भवति। तादृशविभावेन सामाजिक: रसानुभूतिं

कर्तुमर्हतीति न शंकनीयम्। अथवा रंगमञ्चस्थं सीतादिरूपं विभावं समवलोक्य सामाजिक: स्वकान्तां संस्मृत्य तद्वारा रसानुभूतिं करोतीत्यपि असंगतम्, यत: देवतादिवर्णनस्थले सीतारामाद्यभिनयस्थले वा सीतादौ देवतात्वबुद्ध्या साधारणीकरणं सम्भवं नास्ति । यस्य स्वकान्ता नास्ति, नासीद्वा तस्य स्वकान्तास्मरणमेव न सम्भाव्यते । अतो रसस्य स्वगतत्वेन परगतत्वेन वा उत्पत्ति: प्रतीतिर्वा न भवितुमर्हति।

एवमेव रसस्याभिव्यक्तिरपि भवितुं नार्हति, यतः पूर्वतो विद्यमानस्यैव वस्तुनोऽभिव्यक्तिर्भवति। रसस्तु तदानीं सामाजिकैरनुभूयते। अनुभवात् पूर्वं पश्चाच्च रसस्यास्तित्वमेव नास्ति, अतो रसस्य उत्पत्ति: प्रतीतिरभिव्यक्तिर्वा न जायते।

अभिनवभारत्या भट्टनायकस्य मतमेवमुद्धृतमस्ति - “भट्टनायकस्त्वाह - रसो न प्रतीयते नोत्पद्यते नाभिव्यज्यते। स्वगतत्वेन हि प्रतीतौ करुणे दु:खित्वं स्यात् न च सा प्रतीतिर्युक्ता सीतादेरविभावत्वात् स्वकान्तास्मृत्यसंवेदनात्। देवतादौ साधारणीकरणायोग्यत्वात्। समुद्रलंघनादेरसाधारण्यात् न च तद्वतो रामस्य स्मृतिरनुपलब्धत्वात्। न च शब्दानुमानादिभ्यस्तत्प्रतीतौ लोकस्य सरसतायुक्ता प्रत्यक्षादिव। नायक-युगलावमभासे हि प्रत्युत लज्जाजुगुप्सास्पृहादिस्वोचित्तवृत्यन्तरोदयः। अव्यगतयाकाशरसत्वमपि स्यात्। तन्न प्रतीतिरनुभवस्मृत्यादिरूपा रसस्य युक्ता। उत्पत्तावपि तुल्यमेतद्दूषणम्। शक्तिरूपत्वेन पूर्वं स्थितस्य पश्चादभिव्यक्तौ विषयार्जनतारतम्यापत्तिः। स्वगतपरगतत्वादि च पूर्ववद् विकल्प्यम् ।”

“तस्मात् काव्ये दोषाभावगुणालंकारमयत्वलक्षणेन, नाट्ये चतुर्विधाभिनयरूपेण निविडनिजमोहसंकटनिवारणकारिणा विभावादिसाधारणीकरणात्मना, अभिधातो द्वितीयेनांशेन भावकत्वव्यापारेण भाव्यमानो रसो, अनुभवस्मृत्यादिविलक्षणेन रजस्तमोऽनुवेधवैचित्र्यबलाद् द्रुतिविस्तारविकासलक्षणेन परब्रह्मास्वादसविधेन भोगेन परं भुज्यत इति ।[9]

काव्यप्रकाशकारः मम्मटोऽपि भट्टनायकस्य मतमुद्धरति - "न ताटस्थ्येन नात्मगतत्वेन रस: प्रतीयते, नोत्पद्यते, नाभिव्यज्यते अपि तु काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः स्थायी, सत्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्वेन भोगेन भुज्यते ।"[10]

अर्थात् न तु तटस्थनटस्य सम्बन्धेन नैवात्मगतसामाजिकरूपेण रसस्य प्रतीतिरूत्पत्तिरभिव्यक्तिर्वा भवति, अपितु काव्ये (नाटक) अभिधया भिन्न: भावकत्वव्यापारः भवति, येन विभावादे: साधारणीकरणं भवति। तेन साधारणीकृतस्थायीभावः तेन भोजकत्वव्यापारेण भुज्यते। सत्वोद्रेकात् जायमाना प्रकाशात्मिका आनन्दात्मिका अनुभूतिरेव यस्य भोगस्य स्वरूप: वर्तते । एवं प्रकारेण भट्टनायकस्य मतानुसारं सूत्रस्यार्थः वर्तते -

विभावानुभावव्यभिचारिसंयोगात् = भोज्य-भोजक-संबन्धात्, रसनिष्पत्तिः = भोग: भुक्तिर्वेति ।

एवं सति भट्टनायकः स्वयमेव रसास्वादप्रक्रियामित्थं दर्शयति - सुकविप्रयुक्तकाव्यशब्दस्य अभिधायकत्वभावकत्व-भोजकत्वरूपत्र्यंशताप्रसादात् अन्यशब्देभ्यो वैलक्षण्यं भवति। भावकत्वरूपद्वितीयव्यापारेण रसादिविषयकेण काव्यार्थविभावादीनां साधारणीकरणं जायते। एवं साधारणीकृते रत्यादौ भाविते सति तृतीयेन सहृदयविषयकेण भोजकत्वव्यापारेण तस्य भावितरसस्य भोगः आस्वादो भवति। यो हि आस्वादः अनुभवस्मृतिभ्यां विलक्षण: चित्तस्य द्रुतिविस्तरविकासरूप: रजस्तमोभ्यामस्पृष्टः सत्त्वमय: निजचेतनस्वरूपः आनन्दमयः परब्रह्मास्वादसहोदरो भवति । यथाहि लोचने अभिनवगुप्तः वर्णयति -

"किन्त्वन्यशब्दवैलक्षण्यं काव्यमात्मन: शब्दस्य त्र्यंशताप्रसादात्। तत्राभिधायकत्वं वाच्यविषयं भावकत्वं रसादिविषय भोक्तृत्वं सहृदयविषयमिति त्रयोंऽशभूता व्यापाराः। तेन रसभावनाख्यो द्वितीयो व्यापार: यद्वशादभिधा विलक्षणैव। तच्चैतद् भावकत्वं नाम यत् काव्यस्य तद् विभावादीनां साधारणत्वापादनं नाम। भाविते च रसे तस्य भोज: योऽनुभवस्मरणप्रतिपन्नेभ्यो

विलक्षण एव द्रुतिविस्तरविकासनामा रजस्तमो वैचित्र्यादनुविद्धसत्त्वमयनिजचित्स्वभावनिर्वृत्तिविश्रान्तिलक्षणः परब्रह्मास्वादसचिवः।[11]

समीक्षा- परमिदमपि मतं निराकुर्वन्तः अभिनवगुप्तपादादयः प्रतिपादयन्ति यत् काव्यजगति अप्रसिद्धयोर्भावकत्वभोजकत्वव्यापारयोरावश्यकत्वमेव नास्ति। अभिधाव्यापारात् परम् एकेनैव व्यञ्जनाव्यापारेण विभावादीनां साधारणीकरणसाधारणीकृतभावितरत्यादेः अभिव्यञ्जनञ्च भवति। यथा हि एकेनैव प्रदीपेन तमोऽपनयनं, घटादेः प्रकाशनञ्च भवति, तथैव एकेन व्यञ्जनेन उभयमपि कार्यं सिद्धयति। अतः संयोगात् रसनिष्पत्तिः इत्यस्य भोज्यभोजकभावाद् रसभुक्तिरित्यर्थो न समीचीनः।

## (ङ) अभिनवगुप्तस्य अभिव्यक्तिवादः

भरतसूत्रव्याख्यानविषये ध्वनिवादीव्यञ्जनावादिनोऽभिनवगुप्तस्यैवान्तिमं मतम् । आनन्दवर्धनद्वारा प्रतिष्ठापितसिद्धान्तानुसारेणायं रसं ध्वनेरेवैकं प्रमुखभेदमर्थात् रसध्वनिं स्वीकरोति। अतएव रसो व्यङ्ग्यः अभिधावृत्तित्र्यागम्यः केवलं व्यञ्जनावृत्तिद्वाराऽभिव्यक्तो भवति। काव्यनाटकादिषु प्रयुक्ता विभावादयो रसव्यञ्जकाः रसश्चाभिव्यङ्गयः। इत्थमभिनवगुप्तपादोऽयं रसविभावादिषु परस्परं व्यङ्गयव्यञ्जकभावं स्वीकरोति।

एतदनुसारेण लौकिकरसानुभूतेः कारणकार्यसहकारीणि यदा काव्यनाट्ययोः विभावनानुभावनव्यभिचारणव्यापारैर्युक्तानि भवन्ति तदा ते विभावानुभावव्यभिचारिणः अलौकिका भवन्ति। एतेषामलौकिकविभावादीनां साधारण्येन प्रतीतिर्भवति। अर्थात् इमे विभावाः परस्यैव न मम, ममैव न परस्य इत्यात्मिका परत्वात्मीयत्वबुद्धिस्तत्र न भवति। एतैः साधारण्येन प्रतीतैर्विभावादिभिः सहृदयहृदयस्था रत्यादिस्थायिभावाः अभिव्यञ्जिता भवन्ति। यथा हि पिहितमुखनिहितघटे प्रदीप्तो मणिः घटे अनावृते सद्यः प्रकाशते तथैव हृदिस्थो भावः विभावादिद्वारा आवरणभङ्गे सति झटित्येवावभासते। स च भासमानो रत्यादिभावो रसाभिधानेन परमानन्दरूपतां धत्ते। सहृदया इमं रसानन्दमास्वादयन्ति।

आस्वाद्यमानता अर्थात् आस्वादः एव रसस्यास्य स्वरूपनिष्पत्तौ निमित्तम्। विभावादिरेव अस्य जीवनसीमा। पानकरसवद् विलक्षणो रसास्वादोऽयं रसयितुः सर्वांगम् आलिंगन् वेद्यान्तरं तिरोदधत्, ब्रह्मास्वादमिव अनुभावयन् अलौकिकचमत्कारी भवति। यथाहि काव्यप्रकाशे अभिनवगुप्तस्य मतमुपन्यस्तम् -

“लोके प्रमदादिभिः स्थाय्यनुमानेऽभ्यासपाटववतां काव्ये नाट्ये च तैरेव कारणत्वादि परिहारेण विभावनादिव्यापारवत्त्वादलौकिकविभावादिशब्दव्यवहार्य्यैर्ममैवैते शत्रोरेवैते, तटस्थस्यैवैते, न ममैवैते, न शत्रोरेवैते न तटस्थस्यैवैते इति सम्बन्धविशेषस्वीकारपरिहारनियमानध्यवसायात् साधारण्येन प्रतीतैरभिव्यक्तः सामाजिकानां वासनात्मकतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् तत्कालविगलितपरिमितप्रमातृभाववशोन्मिषितवेद्यान्तरसम्पर्कशून्यापरिमितभावेन प्रमात्रा सकलसहृदयसंवादभाजा साधारण्येन स्वाकार इवाभिन्नोऽपि गोचरीकृतश्चर्व्यमाणतैकप्राणः, विभावादिजीविताविधिः पानकरसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन्, हृदयमिव प्रविशन्, सर्वाङ्गीणमिवालिङ्गन्, अन्यत्सर्वमिव तिरोदधद् ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारी शृङ्गारादिको रसः।

स च न कार्यः, विभावादिविनाशेऽपि तस्य सम्भवप्रसङ्गात्। नापि ज्ञाप्यः, सिद्धस्य तस्यासम्भवात्। अपि तु विभावादिभिर्व्यञ्जितश्चर्वणीयः।

कारकज्ञापकाभ्यामन्यत् क्व दृष्टमिति चेत् ? न क्वचिद् दृष्टमित्यलौकिकत्वसिद्धेर्भूषणमेतन्न दूषणम्।

चर्वणानिष्पत्त्या तस्य निष्पत्तिरूपचरितेति कार्योऽप्युच्यताम्। लौकिकप्रत्यक्षादिप्रमाणताटस्थ्यावनोधशालिमित-योगिज्ञानवेद्यान्तरसंस्पर्शरहितस्वात्ममात्रपर्यवसितपरिमितेतरयोगिसंवेदन विलक्षणलोकोत्तरस्वसंवेदनगोचर इति प्रत्येयोऽप्यभि-धीयताम् ।

तद्ग्राहकं च न निर्विकल्पकं विभावादिपरामर्शप्रधानत्वात्। नापि सविकल्पकं चर्व्यमाणस्यालौकिकानन्दमयस्य स्वसंवदेनसिद्धत्वात्। उभयाभावस्वरूपस्य चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति न तु विरोधामिति श्रीमदाचार्याभिनवगुप्तपादाः।[12]

एतन्मतस्य सारांश एवमस्ति -

1. रसनिष्पत्ति: रसाभिव्यक्तिर्वा सामाजिकेषु भवति।
2. यथा पृथिव्यां बीज: अनुकूलस्थितौ अंकुरितो भवति तथैव सहृदयमनसि रतिशोकनिर्वेदादिस्थायिभावो दृश्यश्रव्ययोर्वा माध्यमेन अभिव्यक्तो भवति । अत: सामाजिकेषु स्थायिभावो वासना वा संस्काररूपेण स्थिरतया तिष्ठति।
3. साधारणीकृतविभावादिभि: स्थायिभाव: उद्बुद्धो भवति। विभावादिसंयोगादव्यक्तरूपेणाभिव्यक्तो भवति, यथा जलबिन्दुपतनेन मृत्तिकाया: गन्धस्याभिव्यक्तिर्भवति तद्वत्।
4. काव्यादीनां पाठो नाटकानामभिनयः सहृदयानां स्थायिभावस्य जागृतिसाधनम्। पाठकदर्शकयोः स्वोद्बुद्धस्थायिभावस्य शुद्धरूपे तन्मयतया चित्तवृत्तीनामेकाग्रत्वात् ब्रह्मानन्दसहोदराखण्डस्यानन्दप्राप्तिर्भवति।
5. रससूत्रस्थ 'संयोगादित्यस्य' 'व्यङ्ग्यव्यञ्जकभावात्' 'निष्पत्तिरित्यस्य' च अभिव्यक्तिरित्यर्थः। एतन्मतानुसारेण सामाजिकहृदयेषु वासनारूपेण स्थितो रत्यादिस्थायिभावो विभावादिद्वारा व्यङ्गयव्यञ्जकभावेन तथाभिव्यक्तो भवति यथा मृदगन्धाभिव्यक्तिर्भवति जलबिन्दुसम्पर्कात्। अस्यां दशायां सहृदय आनन्दघनस्यानुभवं करोति। योगवद्रससन्ततिं प्रमिणोति। द्वयोरपि दर्शनयोर्मध्ये पूर्णानन्दस्यानुभवो भवति। अभिनवगुप्तस्येयं तुलना शैववेदान्तस्य विमर्शावस्थया सञ्जायते, यत्र साधकः 'शिवोऽहम्' इत्यस्यानुभवं करोति। रसानुभूतिश्चालौकिकः प्रपाणकरसवदास्वादोऽत्र विभाव्यते। तत्र

साधारणीकरणस्यैव प्रभावः। वैयक्तिकरागद्वेषादीनां लोपात् साधारणीकरणकारणेनैव रसानुभूतिर्भवति।

अस्यां दशायामवस्थिते चात्यावश्यकमिदं यद्विभावादयः स्वस्ववैयक्तिकरूपं परित्यजेयुः, अथ च सामाजिका: अपि स्वस्य निर्वैयक्तिकत्वमवश्यं धारयेयुः। तस्मिन्समये रामसीतादय: स्वव्यक्तित्वं परित्यज्य केवलं नायकनायिकारूपेणास्मत्समक्षे आयान्ति। अथ च वयं तत्र रसानुभवकर्तारो भवामः। इत्थञ्च विभावादयः केवलं विषयमात्रम्, सामाजिकाश्च केवलं विषयमात्रमवतिष्ठन्ते। इदमेव साधारणीकरणम्।

काव्यरसो न प्रणालिकया प्रवहति, नापीक्षुसवन्नीपीडितो भवति । किन्तु काव्यगतविभावादिद्वारोबोधितो रजोगुणतमोगुणविमुक्तः सत्वगुणप्रधानात्मप्रकाशेन प्रकाशमानः सहृदयवासनागतस्थायिभावस्यास्वादजन्यानन्दः। व्यक्तिगतसंस्कारो हि साधारणीकृतो भूत्वा शीशकाक्षररूपोऽथवा तदाधाररूपः सञ्जायते। शीशकाक्षरं व्यक्तिसाधारणयोर्मध्यवर्तिवस्तु। एतदाधारमिलनहेतुनाखण्डचिन्मयात्मप्रकाशेऽपि वीरशृङ्गारादीनां भेदा: अवलोक्यन्ते। स चानन्दः यतः प्रसरति चित्तं व्याप्नोति, अतो ‘रस'पदव्यपदेश्यो भवतीति बोध्यम्।

अतोऽभिनवमतानुसारं सहृदयहृदयस्थो इत्यादिस्थायिभाव एव व्यञ्जनयाभिव्यक्तो रसो रसास्वादो वाऽभिधीयते। अतश्च संयोगाद् रसनिष्पत्तिः इत्यस्य व्यङ्ग्यव्यञ्जकभावसम्बन्धाद् रसाभिव्यक्तिरित्यर्थे पर्यवस्यति।

---

1. नाटय़शास्त्रम् षष्ठ: अध्याय:
2. नाटय़शास्त्रम् षष्ठ: अध्याय:
3. रससिद्धान्तः(नगेन्द्रस्य) पृ. - 123
4. अभिनवभारती, प्रथमभाग: पृ. 272
5. अभिनवभारती (गा. ओ. सी.), पृ. - 274

6. काव्यप्रकाश: चतुर्थ: उन्लास:

7. काव्यप्रकाश: चतुर्थ: उल्लास: 25, 26

8. रसगंगाधर: (म. शा.) पृ. - 151

9. अभिनवभारती - षष्ठ: अध्याय:

10. काव्यप्रकाश: चतुर्थ: उल्लास:

11. ध्वन्यालोकलोचने (सम्पादक: विश्वेश्वर: )पृ. 83

12. काव्यप्रकाश: चतुर्थ: उल्लास: